श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री वादिराजयति कृतं

# ॥ श्री दशावतारस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री दशावतारस्तोत्रम् ॥

नमोऽस्तु नारायणमन्दिराय
    नमोऽस्तु हारायणकन्धराय।
नमोऽस्तु पारायणचर्चिताय
    नमोऽस्तु नारायण तेऽर्चिताय ॥ 1 ॥

नमोऽस्तु मत्स्याय लयाब्धिगाय
    नमोऽस्तु कूर्माय पयोब्धिगाय।
नमो वराहाय धराधराय
    नमो नृसिंहाय परात्पराय ॥ 2 ॥

नमोऽस्तु शक्राश्रयवामनाय
    नमोऽस्तु विप्रोत्सवभार्गवाय।
नमोऽस्तु सीताहितराघवाय
    नमोऽस्तु पार्थस्तुतयादवाय ॥ 3 ॥

नमोऽस्तु बुद्धाय विमोहकाय
    नमोऽस्तु ते कल्किपयोदिताय।
नमोऽस्तु पूर्णामितसद्गुणाय
    समस्तनाथाय हयाननाय ॥ 4 ॥

करस्थशङ्खोल्लसदक्षमाला -
    प्रबोधमुद्राभयपुस्तकाय।
नमोऽस्तु वक्त्रोद्गिरदागमाय
    निरस्तहेयाय हयाननाय ॥ 5 ॥

रमासमाकारचतुष्टयेन
क्रमाच्चतुर्दिक्षु निषेविताय।
नमोऽस्तु पार्श्वद्वयगद्विरूप -
श्रियाऽभिषिक्ताय हयाननाय॥ 6॥

किरीटपट्टाङ्गदहारकाञ्ची -
सुरत्नपीतांबरनूपुराद्यैः।
विराजिताङ्गाय नमोऽस्तु तुभ्यं
सुरैः परीताय हयाननाय॥ 7॥

विदोषकोटीन्दुनिभप्रभाय
विशेषतो मध्वमुनिप्रियाय।
विमुक्तवन्द्याय नमोऽस्तु विष्व -
ग्विधूतविघ्नाय हयाननाय॥ 8॥

नमोऽस्तु शिष्टेष्टदवादिराज -
कृताष्टकाभिष्टुतचेष्टिताय।
दशावतारैस्त्रिदशार्थदाय
निशेशबिम्बस्थ हयाननाय॥ 9॥

॥ श्री दशावतारस्तोत्रं समाप्तम्॥